# ऋग्वेदः - मण्डल १०

## चित्रमहा वासिष्ठः



**Exported from Wikisource on २६ जुलाईमासः २०२४**

दे. अग्निः । जगती, १, ५ त्रिष्टुप् ।

वसुं न चित्रमहसं गृणीषे वामं शेवमतिथिमद्विषेण्यम् ।
स रासते शुरुधो विश्वधायसोऽग्निर्होता गृहपतिः सुवीर्यम्
॥१ ॥

जुषाणो अग्ने प्रति हर्य मे वचो विश्वानि विद्वान्वयुनानि
सुक्रतो ।
घृतनिर्णिग्ब्रह्मणे गातुमेरय तव देवा अजनयन्ननु व्रतम् ॥
२ ॥

सप्त धामानि परियन्नमर्त्यो दाशद्दाशुषे सुकृते मामहस्व ।
सुवीरेण रयिणाग्ने स्वाभुवा यस्त आनट् समिधा तं जुषस्व
॥३ ॥

यज्ञस्य केतुं प्रथमं पुरोहितं हविष्मन्त ईळते सप्त

वाजिनम् ।

शृण्वन्तमग्निं घृतपृष्ठमुक्षणं पृणन्तं देवं पृणते सुवीर्यम् ॥

४ ॥

त्वं दूतः प्रथमो वरेण्यः स हूयमानो अमृताय मत्स्व ।

त्वां मर्जयन्मरुतो दाशुषो गृहे त्वां स्तोमेभिर्भृगवो वि

रुरुचुः ॥५ ॥

इषं दुहन्सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुक्रतो ।

अग्ने घृतस्नुस्त्रिरृतानि दीद्यद्वर्तिर्यज्ञं परियन्सुक्रतूयसे ॥

६ ॥

त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजन्त मानुषाः

।

त्वां देवा महयाय्याय वावृधुराज्यमग्ने निमृजन्तो अध्वरे ॥

७ ॥

नि त्वा वसिष्ठा अह्वन्त वाजिनं गृणन्तो अग्ने विदथेषु

वेधसः ।

रायस्पोषं यजमानेषु धारय यूयं पात स्वस्तिभिः सदा नः ॥

८ ॥

## सायणभाष्यम्

वसुं न ' इत्यष्टर्चं दशमं सूक्तं वसिष्ठपुत्रस्य चित्रमहस आर्षमाग्नेयम् । आद्यापञ्चमी त्रिष्टुभौ शिष्टा जगत्यः । तथा चानुक्रान्तं-- वसुं नाष्टौ चित्रमहा वासिष्ठ आग्नेयं जागतमाद्यां पञ्चमीं चर्ते ' इति । प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ जागते छन्दसीदं सूक्तम् । सूत्रितं च--- वसुं न चित्रमहसमिति जागतम्' ( आश्व. श्रौ. ४ , १३) इति ।।

वसुं न चित्रमंहसं गृणीषे वामं शेवमतिंथिमद्विषेण्यं ।

स रांसते शुरुधों विश्वधांयसोऽग्निर्होतां गृहपंतिः सुवीर्यं ॥१

वसुंम् । न । चित्रऽमंहसम् । गृणीषे । वामम् । शेवंम् । अतिंथिम् । अद्विषेण्यम् ।

सः । रासते । शुरुधः । विश्वऽधांयसः । अग्निः । होतां । गृहऽपंतिः । सुऽवीर्यंम् ॥१

वसुम् । न । चित्रऽमहसम् । गृणीषे । वामम् । शेवम् । अतिथिम् । अद्विषेण्यम् ।

सः । रासते । शुरुधः । विश्वऽधायसः । अग्निः । होता ।
गृहऽपतिः । सुऽवीर्यम् ॥१

“वसुं “न वासकं सूर्यमिव “चित्रमहसं चायनीयतेजस्कमग्निं “गृणीषे गृणे स्तौमि ।। गॄ शब्दे' । क्रैयादिकः । पुरुषव्यत्ययः । प्वादित्वाद्धरस्वः ॥ यद्वा । चित्रमहसमिति प्रथमार्थे द्वितीया । न इति संप्रत्यर्थे । संप्रति वासकमग्निमहं चित्रमहाः स्तौमि । कीदृशम् । “वामं वननीयं “शेवं सुखकरम् “अतिथिम् अतिथिवत्पूज्यं यद्वा हविर्वहनाय सततगामिनम् “अद्विषेण्यं द्वेष्यरहितम् ।। द्विषेः ‘कृत्यार्थे तवैकेन्” इति केन्यप्रत्ययः । नञा “ बहुव्रीहौ नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् ।। “सः “अग्निः “शुरुधः शोकस्य रोधयित्रीर्निवारयित्रीः “विश्वधायसः क्षीरप्रदानादिना विश्वं सर्वं जगद्धारयन्तीर्गाः सुवीर्यं शोभनवीर्यं च “रासते यजमानेभ्यो ददाति ॥ ‘ रा दाने ' । अस्माल्लेट्यडागमः । ‘सिब्बहुलम्' इति सिप् । व्यत्ययेनात्मनेपदम् । विश्वशब्दोपपदाद्दधातेः ‘वहिहाधाञ्भ्यः' इत्यसुन् । ‘ णित्' इत्यनुवृत्तेः “आतो युक्चिण्° ' ( पा. सू. ७.३.३३ ) इति युक् । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् ।। कीदृशोऽग्निः । "होता देवानामाह्वाता होमनिष्पादको वा “गृहपतिः यजमानगृहाणामीश्वरः ।। ' गेहे कः' (पा. सू. ३. १. १४४ ) इति ग्रहेः कप्रत्ययः । ‘ ग्रहिज्या' (पा. सू. ६. १. १६ ) इत्यादिना संप्रसारणम् । ' पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वम् । शोभनं वीर्यं यस्येति बहुव्रीहौ ‘ वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् ।।

जुषाणो अंग्ने प्रतिं हर्य मे वचो विश्वांनि विद्वान्वयुनांनि सुक्रतो
।

घृतंनिर्णिग्ब्रह्मंणे गातुमेरंय तवं देवा अंजनयन्ननुं व्रतं ॥२

जु॒षा॒णः । अ॒ग्ने॒ । प्रति॑ । ह॒र्य॒ । मे॒ । वचः॑ । विश्वा॑नि । वि॒द्वान् । व॒युना॑नि । सु॒क्र॒तो॒ इति॑ सुऽक्रतो ।

घृतं॑ऽनिर्निक् । ब्रह्म॑णे । गा॒तुम् । आ । ई॒र॒य॒ । तव॑ । दे॒वाः । अ॒ज॒न॒य॒न् । अनु॑ । व्र॒तम् ॥२

जुषाणः । अग्ने । प्रति । हर्य । मे । वचः । विश्वानि । विद्वान् । वयुनानि । सुक्रतो इति सुऽक्रतो । २ घृतऽनिर्निक् । ब्रह्मणे । गातुम् । आ । ईरय । तव । देवाः । अजनयन् । अनु । व्रतम् ॥२

हे “अग्ने “जुषाणः प्रीयमाणस्त्वं “मे मम “वचः वचनं स्तोत्रं “प्रति “हर्य कामयस्व । ‘ हर्य गतिकान्त्योः ' । तथा हे “सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा त्वं “विश्वानि सर्वाणि “वयुनानि । ज्ञाननामैतत् इह ज्ञातव्ये वर्तते । ज्ञातव्यान्यर्थजातानि “विद्वान् जानन् वर्तसे । हेतौ शतृप्रत्ययः । यतो जानासि ततो हतोर्मद्वचनं कामयस्वेत्यर्थः । हे “घृतनिर्णिक् घृतेनाज्येन निर्णिज्यमान पुष्यमाणशरीर । ‘ णिजिर् शौचपोषणयो :'। यद्वा । निर्णिगिति रूपनाम । दीप्तरूपाग्ने “ब्रह्मणे ब्राह्मणाय यजमानाय “गातुं गातव्यं ज्ञातव्यं वा यज्ञम् “एरय आगमय । “तव “व्रतं त्वदीयं यज्ञकर्म “अनु पश्चात् "देवाः इन्द्रादयः सर्वे “अजनयन् । यजमानाय फलानि जनयन्ति । अतस्त्वदीयं यज्ञं यजमानाय प्रापयेत्यर्थः ।। लक्षणेऽनोः कर्मप्रवचनीयत्वम् । व्रतमिति कर्मप्रवचनीययुक्त इति द्वितीया । जनेर्ण्यन्ताच्छान्दसो लङ्। ‘जनीजॄष्क्नसुरञ्जोऽमन्ताश्च ' इति मित्त्वात् ‘मितां ह्रस्वः' इति ह्रस्वत्वम् ॥

स॒प्त धामा॑नि परि॒यन्नम॑र्त्यो॒ दाश॑द्दा॒शुषे॑ सु॒कृते॑ मामहस्व ।

सु॒वीरे॑ण र॒यिणा॑ग्ने स्वा॒भुवा॒ यस्त॒ आन॑ट् स॒मिधा॒ तं जु॑षस्व ॥३

स॒प्त । धामा॑नि । प॒रि॒ऽयन् । अम॑र्त्यः । दाश॑त् । दा॒शुषे॑ । सु॒ऽकृते॑ । म॒म॒ह॒स्व॒ ।

सु॒ऽवीरे॑ण । र॒यिणा॑ । अ॒ग्ने॒ । सु॒ऽआ॒भुवा॑ । यः । ते॒ । आन॑ट् । स॒म्ऽइधा॑ । तम् । जु॒ष॒स्व॒ ॥३

सप्त । धामानि । परिऽयन् । अमर्त्यः । दाशत् । दाशुषे । सुऽकृते । ममहस्व ।

सुऽवीरेण । रयिणा । अग्ने । सुऽआभुवा । यः । ते । आनट् । सम्ऽइधा । तम् । जुषस्व ॥३

हे अग्ने “सप्त सप्तसंख्याकानि “धामानि स्थानानि पृथिव्यादिलोकात्मकानि “परियन् परितो गच्छन् “अमर्त्यः मरणधर्मरहितस्त्वं यो यजमानः पुरोडाशादीनि हवींषि “दाशत् प्रयच्छति तस्मै “दाशुषे दत्तवते “सुकृते सुष्ठु यागं कृतवते “मामहस्व । अपेक्षितं धनं ददस्व । महतिर्दानकर्मा ।। ‘ सुकर्मपाप' (पा. सू. ३. २. ८९ ) इत्यादिना सुपूर्वात्कृञो भूते काले क्विप् ।। “यः च यजमानः “समिधा समिन्धनसाधनेनेध्मेन हे “अग्ने “ते त्वाम् “आनट् प्राप्नोति ।। नशतिर्गतिकर्मा । अस्माच्छान्दसो लङ् । 'बहुलं छन्दसि' इति शपो लुक् । 'छन्दस्यपि दृश्यते' इत्याडागमः । अश्नोतेर्वा व्यत्ययेन श्नम् ।। “तं यजमानं “सुवीरेण । शोभनवीराः पुत्रा यस्य ।। ‘ वीरवीर्यौ च इत्युत्तरपदाद्युदात्तत्वम् ॥ तादृशेन “स्वाभुवा सुष्ठु आ समन्ताद्भूष्णुना वर्धिष्णुना “रयिणा धनेन दातव्येन सार्धं “जुषस्व ॥

य॒ज्ञस्यं के॒तुं प्र॑थ॒मं पु॒रोहिंतं ह॒विष्मंत ईळते स॒प्त वा॒जिनं ।

शृ॒ण्वंतंम॒ग्निं घृ॒तपृं॑ष्ठमु॒क्षणं पृ॒णंतं दे॒वं पृंण॒ते सु॒वीर्यं ॥४

य॒ज्ञस्यं । के॒तुम् । प्र॒थ॒मम् । पु॒रःऽहिंतम् । ह॒विष्मंन्तः । ई॒ळ॒ते॒ । स॒प्त । वा॒जिनंम् ।

शृ॒ण्वन्तंम् । अ॒ग्निम् । घृ॒तऽपृं॑ष्ठम् । उ॒क्षणंम् । पृ॒णन्तंम् । दे॒वम् । पृ॒ण॒ते । सु॒ऽवीर्यंम् ॥४

यज्ञस्य । केतुम् । प्रथमम् । पुरःऽहितम् । हविष्मन्तः । ईळते । सप्त । वाजिनम् ।

शृण्वन्तम् । अग्निम् । घृतऽपृष्ठम् । उक्षणम् । पृणन्तम् । देवम् । पृणते । सुऽवीर्यम् ॥४

“यज्ञस्य यागस्य “केतुं प्रज्ञापकं “प्रथमं सर्वेषु देवेषु मुख्यं प्रथमस्थानं वा “पुरोहितं पुरतो हितकारिणम् । यद्वा । पुरस्तात् पूर्वस्यां दिश्याहवनीयरूपेण निहितम् ।। ‘ पूर्वाधरा' (पा. सू. ५ . ३. ३९ ) इत्यादिना पूर्वशब्दादसिःप्रत्ययः । तत्संनियोगेन प्रकृतेः पुरादेशश्च । ' तद्धितश्चासर्वविभक्तिः ' ( पा. सू. १. १. ३८) इत्यव्ययसंज्ञायां ‘ पुरोऽव्ययम् ' ( पा. सू. १, ४ . ६७ ) इति गतिसंज्ञा । धाञः कर्मणि निष्ठा । दधातेर्हिः । ततः समासे ‘ गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् ॥ “वाजिनं बलवन्तमन्नवन्तं वा “शृण्वन्तम् अस्मत्स्तुतीः श्रोत्रेण जानन्तं “घृतपृष्ठं दीप्तपृष्ठं दीप्ताङ्गम् “उक्षणं यागद्वारेण वृष्टेः संभक्तारं यद्वा सेचनसमर्थं युवानं “पृणते हविर्भिः प्रीणयित्रे यजमानाय ॥ ‘ पृण प्रीणने ' । तौदादिकः । ‘ शतुरनुमः' इति विभक्तेरुदात्तत्वम् । ‘ क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थी ।।

हविर्भिः प्रीणयन्तं यजमानं “पृणन्तं धनैः प्रीणयन्तम् । यद्वा । पृणतिर्दानकर्मा । हवींषि ददते यजमानाय पृणन्तं धनानि प्रयच्छन्तम् । “सुवीर्यं शोभनवीर्योपेतं “देवं द्योतमानं दानादिगुणयुक्तं वा एवंगुणविशिष्टम् “अग्निं “हविष्मन्तः हविर्भिर्युक्ताः “सप्त होतृप्रमुखा वषट्कर्तारः “ईळते स्तुवन्ति ॥ ‘ईड स्तुतौ' । आदादिकः ।।

त्वं दूतः प्रथमो वरेण्यः स हूयमानो अमृताय मत्स्व ।

त्वां मर्जयन्मरुतो दाशुषो गृहे त्वां स्तोमेभिर्भृगवो वि रुरुचुः ॥५

त्वम् । दूतः । प्रथमः । वरेण्यः । सः । हूयमानः । अमृताय । मत्स्व ।

त्वाम् । मर्जयन् । मरुतः । दाशुषः । गृहे । त्वाम् । स्तोमेभिः । भृगवः । वि । रुरुचुः ॥५

त्वम् । दूतः । प्रथमः । वरेण्यः । सः । हूयमानः । अमृताय । मत्स्व ।

त्वाम् । मर्जयन् । मरुतः । दाशुषः । गृहे । त्वाम् । स्तोमेभिः । भृगवः । वि । रुरुचुः ॥५

हे अग्ने “त्वं “दूतः देवानां दूतकर्मणि नियुक्तः “प्रथमः मुख्यः प्रथितः प्रख्यातो वा “वरेण्यः संभजनीयश्चासि । “सः त्वम् “अमृताय अमरणाय तदर्थं नोऽस्माभिः "हूयमानः हविषा तर्प्यमाणो वा सन् “मत्स्व तृप्यस्व ।। ‘मदी हर्षे' । छान्दसो विकरणस्य लुक् ।। अपि च “त्वां मध्यमस्थाने वैद्युतरूपेण वर्तमानं “मरुतः तत्रत्या देवगणाः “मर्जयन् मार्जयन्ति अलंकुर्वन्ति ।

तथा “दाशुषः हवींषि दत्तवतो यजमानस्य “गृहे “स्तोमेभिः स्तोमैः स्तोत्रैः “भृगवः भृगुगोत्रा ऋषयस्त्वां वि “रुरुचुः विशेषेण दीपयन्ति ॥ भृगुशब्दादुत्तरस्य तद्धितस्य ‘अत्रिभृगुकुत्स°' (पा. सू. २.४.६५) इत्यादिना बहुषु लुक् । रुरुचुः । ‘ रुच दीप्तौ' । अस्माच्छान्दसो लिट् ॥ ॥ ५ ॥

इषं॑ दु॒हन्त्सु॒दुघां॑ वि॒श्वधा॑यसं यज्ञ॒प्रि॒ये॒ यज॑मानाय सुक्रतो ।

अग्ने॑ घृ॒तस्नु॑स्त्रि॒रृ॒तानि॒ दीद्य॑द्व॒र्तिर्य॒ज्ञं प॑रि॒यन्त्सु॑क्रतूयसे ॥६

इष॑म् । दु॒हन् । सु॒ऽदुघा॑म् । वि॒श्वऽधा॑यसम् । य॒ज्ञ॒ऽप्रि॒ये॑ । यज॑मानाय । सु॒क्र॒तो॒ इति॑ सुऽक्रतो ।

अग्ने॑ । घृ॒तऽस्नुः॑ । त्रिः । ऋ॒तानि॑ । दीद्य॑त् । व॒र्तिः । य॒ज्ञम् । प॒रि॒ऽयन् । सु॒क्र॒तु॒ऽय॒से॒ ॥६

इषम् । दुहन् । सुऽदुघाम् । विश्वऽधायसम् । यज्ञऽप्रिये । यजमानाय । सुक्रतो इति सुऽक्रतो ।

अग्ने । घृतऽस्नुः । त्रिः । ऋतानि । दीद्यत् । वर्तिः । यज्ञम् । परिऽयन् । सुक्रतुऽयसे ॥६

हे “सुक्रतो सुकर्मन् शोभनप्रज्ञ व “अग्ने “यज्ञप्रिये यज्ञैर्हविर्भिर्देवान् प्रीणयित्रे “यजमानाय “विश्वधायसं विश्वस्य सर्वस्य धारयित्रीं “सुदुघां दोग्धुं सुशकां यज्ञरूपिणीं गाम् “इषम् इष्यमाणं यागफलरूपं पयः “दुहन क्षारयन् तथा “घृतस्नुः घृतेनाज्येन प्रस्नातः ।। स्नातेरौणादिकः कुप्रत्ययः ॥ यद्वा । घृतो दीप्तः स्नुः सानुः समुच्छ्रितो ज्वालासमूहो यस्य स तथोक्तः ॥ ‘ पदादिषु मांस्पृत्स्नूनामुपसंख्यानम्' (पा. सू. ६.१.६३.१) इति

सानुशब्दस्य स्नुभावः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ।।
ईदृशस्त्वं “त्रिः त्रिवारमावृत्तानि “ऋतानि सत्यभूतानि
पृथिव्यादीनि त्रीणि स्थानानि । यद्वा गार्हपत्यादीनि स्थानानि
“दीद्यत् दीपयन “वर्तिः सर्वं यज्ञगृहं सर्वमनुष्ठीयमानं यागं च
“परियन् परितो गच्छन् तत्तद्यज्ञगृहं तं तं यज्ञं च प्राप्नुवन्
“सुक्रतूयसे । शोभनं क्रतुं यज्ञमात्मन इच्छसि । यद्वा । शोभनः
क्रतुर्यस्यासौ सुक्रतुर्यजमानः । स इवाचरसि । स यथा
सम्यगनुष्ठाने प्रवर्तते एवं त्वमपि स्वयमेव यागस्य
सम्यग्निष्पत्त्यर्थं प्रवर्तस इत्यर्थः ।।।

त्वामिद॒स्या उ॒षसो॒ व्युं॑ष्टिषु दू॒तं कृं॑ण्वा॒ना अं॑यजंत॒ मानुं॑षाः ।

त्वां दे॒वा मं॑ह॒याय्यां॑य वावृधु॒राज्यं॑मग्ने निमृ॒जंतों॑ अध्व॒रे ॥७

त्वाम् । इत् । अ॒स्याः । उ॒षसः॑ । वि॒ऽउं॑ष्टिषु । दू॒तम् । कृ॒ण्वा॒नाः ।
अ॒य॒ज॒न्त॒ । मानुं॑षाः ।

त्वाम् । दे॒वाः । म॒ह॒याय्यां॑य । व॒वृ॒धुः॒ । आज्यं॑म् । अ॒ग्ने॒ ।
नि॒ऽमृ॒जन्तः॑ । अ॒ध्व॒रे ॥७

त्वाम् । इत् । अस्याः । उषसः । विऽउष्टिषु । दूतम् । कृण्वानाः ।
अयजन्त । मानुषाः ।

त्वाम् । देवाः । महयाय्याय । ववृधुः । आज्यम् । अग्ने ।
निऽमृजन्तः । अध्वरे ॥७

“अस्याः इदानीं दृश्यमानायाः “उषसः “व्युष्टिषु विवासनेषु
प्रभातेषु सत्सु हे “अग्ने “त्वामित् त्वामेव देवानां “दूतं “कृण्वानाः
कुर्वाणाः “मानुषाः मनुष्याः । “अयजन्त यजन्ति । सर्वदेवात्मकं

त्वामेव यजन्तीत्यर्थः । तथा “देवाः अपि “त्वां महयाय्याय पूजायै ।। ‘ मह पूजायाम् । अस्मादौणादिको भाव आय्यप्रत्ययः ।। आत्मनः पूजार्थं “वावृधुः वर्धयन्ति । किं कुर्वन्तः । “अध्वरे । ध्वरो हिंसानिमित्तः प्रत्यवायः । तद्रहिते यागे “आज्यम् । उपलक्षणमेतत् । आज्योपलक्षितं सर्वं हविः "निमृजन्तः त्वयि निमार्जयन्तः । प्रक्षिपन्त इत्यर्थः ।।

नि त्वा॒ वसि॑ष्ठा अह्व॑न्त वा॒जिनं॑ गृ॒णन्तो॑ अग्ने वि॒दथे॑षु वे॒धसः॑ ।

रा॒यस्पोषं॒ यज॑मानेषु धारय यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥८

नि । त्वा॒ । वसि॑ष्ठाः । अ॒ह्व॒न्त॒ । वा॒जिन॑म् । गृ॒णन्तः॑ । अ॒ग्ने॒ । वि॒दथे॑षु । वे॒धसः॑ ।

रा॒यः । पोष॑म् । यज॑मानेषु । धा॒र॒य॒ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । न॒ः ॥८

नि । त्वा । वसिष्ठाः । अह्वन्त । वाजिनम् । गृणन्तः । अग्ने । विदथेषु । वेधसः ।

रायः । पोषम् । यजमानेषु । धारय । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥८

हे “अग्ने “विदथेषु । विदन्त्यस्मिन् यष्टव्यान् देवानिति विदथो यज्ञः । तेषु “वेधसः कर्मणां विधातारः “गृणन्तः स्तुवन्तः “वसिष्ठाः वसिष्ठपुत्रा ऋषयः “वाजिनम् अन्नवन्तं बलवन्तं वा त्वां “नि “अह्वन्त नितरामाह्वयन् । अस्ताविषुर्वा ।। ह्वेञो लुङि • निसमुपविभ्यो ह्वः' (पा. सू. १.३. ३०) इत्यात्मनेपदम् । ‘ आत्मनेपदेष्वन्यतरस्याम् ' (पा. सू.३.१.५४ ) इति च्लेरङादेशः ।

वसिष्ठशब्दाद्विहितस्यापत्यार्थप्रत्ययस्य ' अत्रिभृगुकुत्स' (पा. सू. २. ४. ६५ ) इत्यादिना बहुषु लुक् ॥ स त्वं “यजमानेषु अस्मासु “रायः धनस्य “पोषं पुष्टं “धारय अवस्थापय ॥ ‘ ऊडिदम्' इत्यादिना रैशब्दात् षष्ठ्या उदात्तत्वम् । 'षष्ठ्याः पति पुत्र° (पा. सू. ८, ३. ५३ ) इति विसर्जनीयस्य सत्वम् ॥ गतमन्यत् । एकस्मिन्नप्यग्नौ पूजार्थं बहुवचनम् ॥ ॥ ६ ॥


| | | |
|---|---|---|
| सूक्तं १०.८१ | सूक्तं १०.१२१ | सूक्तं १०.१६१ |
| सूक्तं १०.८२ | सूक्तं १०.१२२ | सूक्तं १०.१६२ |
| सूक्तं १०.८३ | सूक्तं १०.१२३ | सूक्तं १०.१६३ |
| सूक्तं १०.८४ | सूक्तं १०.१२४ | सूक्तं १०.१६४ |
| सूक्तं १०.८५ | सूक्तं १०.१२५ | सूक्तं १०.१६५ |
| सूक्तं १०.८६ | सूक्तं १०.१२६ | सूक्तं १०.१६६ |
| सूक्तं १०.८७ | सूक्तं १०.१२७ | सूक्तं १०.१६७ |
| सूक्तं १०.८८ | सूक्तं १०.१२८ | सूक्तं १०.१६८ |
| सूक्तं १०.८९ | सूक्तं १०.१२९ | सूक्तं १०.१६९ |
| सूक्तं १०.९० | सूक्तं १०.१३० | सूक्तं १०.१७० |
| सूक्तं १०.९१ | सूक्तं १०.१३१ | सूक्तं १०.१७१ |

# About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy
- ThomasBot
- Detlef108
- Shijualex

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium